अथाप्यत्रापि ।

"यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम् ।
त्रिंशत्तदर्द्धांशगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम् ॥"

गर्गस्तु ।

"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम् ।
ताभ्यामेवातिरिच्येत मल्लद्वन्द्वं विशेषतः ॥
अन्येषु दैवाद् भिन्नेषु मल्लद्वन्द्वात् जयेन्नृपः ।
मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम् ॥"

भोजस्तु ।

"यदेव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् ।
सप्रवेशापसरणं सद्द्वन्द्वमुत्तमं विदुः ॥"

इति भोजराजकृतयुक्तिकल्पतरुः ॥

द्वन्द्वः, पुं, (द्वौ द्वौ सहाभिव्यक्तौ इति । निपातनात् साधुः । "चार्थे द्वन्द्व इति निर्द्देशात् पुंस्त्वम् ।) रोगविशेषः । समासभेदः । इति शब्दरत्नावली ॥ स तु भिन्नार्थानां पदानां समासः । वोपदेवेनास्य चसंज्ञा कृता । स इतरेतरयोगसमाहारभेदेन द्विधा भवति । इतरेतरद्वन्द्वो यथा । हरिश्च हरश्च हरिहरौ । अत्र प्रत्येकपदप्राधान्यात् द्वित्वं बहुत्वं शेषशब्दलिङ्गभाजित्वञ्च भवति । समाहारद्वन्द्वो यथा । वाक् च त्वक् च द्वयोः समाहारः वाक्त्वचम् । अत्र संहतेरेकत्वादेकवचनं नित्यक्लीवलिङ्गत्वञ्च भवति । इति मुग्धबोधम् ॥ (यदुक्तं,— [भावः ॥")

"द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यमव्ययी-

द्वन्द्वचरः, पुं, (द्वन्द्वेन चरतीति । चर+अच् ।) चक्रवाकः । इति हेमचन्द्रः । ४ । ३९६ ॥ (यथा, रघुः । १६ । ६३ ।

आवर्त्तशोभा नतनाभिकान्ते-
र्भङ्गो भ्रुवां द्वन्द्वचराः स्तनानाम् ।
जातानि रूपावयवोपमाना-
न्यदूरवर्त्तीनि विलासिनीनाम् ॥")

द्वन्द्वचारी, [न्] पुं, (द्वन्द्वेन चरतीति । चर+णिनिः ।) चक्रवाकः । इति त्रिकाण्डशेषः ॥

द्वन्द्वजः, पुं, (द्वन्द्वात् जायते इति । जन+डः ।) द्विदोषजरोगः । इति निदानम् ॥ कलहाज्जाते, त्रि ॥

द्वयं, क्ली, (द्वौ अवयवौ यस्य । द्वि+"संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । "द्वित्रिभ्यां तयस्यायज्वा ।" ५ । २ । ४३ । इति तयस्यायच् ।) युग्मकम् । दुइ इति भाषा । तत्पर्य्यायः । उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युग्मम् १० यमलम् ११ यामलम् १२ । इति हेमचन्द्रः । ६ । ५९ ॥

द्वयाग्निः, पुं, (द्वयो द्विरूपोऽग्निरिव ।) वृक्षभेदः । रांचिता इति भाषा । तत्पर्य्यायः । पाटी २ हस्ताग्निः ३ । इति शब्दचन्द्रिका ॥

द्वयातिगः, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति । अति+गम+डः ।) रजस्तमोगुणशून्यः । सत्त्वगुणयुक्तः । इत्यमरः ।२ । ७ ।४५॥

द्वाः, [र्] स्त्री, (द्वारयतीति । द्वृ वरणे+णिच्+बाहुलकात् क्विप् ।) द्वारम् । इत्यमरः । २ ।२। १३ ॥ (यथा, भागवते । ३ । ५ । १ ।

"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम् ॥")

उपायः । यथा, ज्ञानद्वारा भवेन्मुक्तिरिति ज्ञानशास्त्रम् ॥

द्वाःस्थः, पुं, (द्वारि तिष्ठतीति । स्था+कः ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १८ । ३४ ।

"ब्राह्मणैः क्षत्त्रबन्धुर्हि द्वारपालो निरूपितः ।
स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥")

नन्दिकेश्वरः । इति भूरिप्रयोगः ॥

द्वाःस्थितः, त्रि, (द्वारि स्थितः ।) द्वारपालः । इत्यमरकोषशब्दरत्नावल्यौ ॥

द्वाःस्थितदर्शकः, त्रि, (द्वाःस्थितः सन् पश्यतीति । दृश्+ण्वुल् ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वाःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितः सन् पश्यतीति । दृश्+णिनिः ।) द्वारपालः । इति भरतधृतरभसः रमानाथश्च ॥

द्वाचत्वारिंशत्, स्त्री, (द्व्यधिका चत्वारिंशत् । द्विशब्दस्य वा आत्वम् ।) द्विचत्वारिंशत् । इति व्याकरणम् ॥ ४२ बेयाल्लिश इति भाषा ॥

द्वात्रिंशत्, स्त्री, (द्व्यधिका त्रिंशत् । "द्व्यष्टनः संख्यायामिति ।" ६।३।४७ । इति आत्वम् ।) द्व्यधिकत्रिंशत् संख्या । तत्संख्येयाश्च । ३२ बत्रिश इति भाषा । यथा, द्वात्रिंशत्प्रसवे नार्य्याश्चतुस्त्रिंशद्गमे नृणामित्यादि ज्योतिस्तत्त्वम् ॥

द्वात्रिंशदक्षरी, [न्] पुं, (द्वात्रिंशदक्षराणि सन्ति अत्र । बाहुलकात् इनिः ।) ग्रन्थः । इति त्रिकाण्डशेषः ॥

द्वात्रिंशल्लक्षणोपेतः, पुं, (द्वात्रिंशल्लक्षणैरुपेतः ।) महापुरुषः । इति शब्दार्थकल्पतरुः ॥ तल्लक्षणानि यथा,—

"रागः सप्तसु हन्त षट्स्वपि शिशोरङ्गेष्वलं तुङ्गता
विस्तारस्त्रिषु खर्व्वता त्रिषु तथा गम्भीरता च त्रिषु ।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु सखे ! संप्रेक्ष्यते सूक्ष्मता
द्वात्रिंशद्वरलक्षणः कथमसौ गोपेषु सम्भाव्यते ॥"

इति श्रीहरिभक्तिरसामृतसिन्धुः ॥

"राग इति । श्रीमद्व्रजेश्वरं प्रति कस्यचित् सवयसो गोपस्य वाक्यमिदम् । सप्तसु नेत्रान्तपादकरतलतालुधरौष्ठजिह्वानखेषु षट्सु वक्षःस्कन्धनखनासिकाकटिमुखेषु । त्रिषु कटिललाटवक्षःसु । केचित् कटिस्थाने शिरः पठन्ति । पुनस्त्रिषु ग्रीवाजङ्घामेहनेषु । पुनस्त्रिषु नाभिस्वरसत्त्वेषु । पञ्चसु नासाभुजनेत्रहनूजानुषु । पुनः पञ्चसु त्वक्केशरोमदन्ताङ्गुलिपर्व्वसु । तथैव महापुरुषलक्षणे सामुद्रकग्रन्थप्रसिद्धैः । द्वात्रिंशद्वराणि तत्तल्लक्षणेभ्यः अन्येभ्योऽपि श्रेष्ठानि लक्षणानि यस्य सः गोपेषु कथमिति भगवदवतारादिषु अप्येतादृशत्वाश्रवणादिति भावः ।" इति श्रीजीवगोस्वामिविरचिता दुर्गमसङ्गमनीनाम्नी टीका ॥

द्वादश, [न्] त्रि, (द्व्यधिका दश । "द्व्यष्टन इति ।" ६।३।४७। इति आत्वम् ।) द्व्यधिका दश । १२ बार इति भाषा । द्वादशसंख्या तत्संख्येयाश्च । अयं नित्यबहुवचनान्तः । त्रिलिङ्गे समानरूपः । इति व्याकरणम् ॥ द्वादशवाचकानि यथा । सूर्य्यः १ मासः २ राशिः ३ संक्रान्तिः ४ गुहबाहुः ५ चारिकोष्ठः ६ गुहनेत्रम् ७ राशिमण्डलम् ८ । इति कविकल्पलता ॥

द्वादशः, त्रि, (द्वादशानां पूरणः । "तस्य पूरणे डट् ।" ५।२।४८। इति डट् ।) द्वादशानां पूरणः । इति व्याकरणम् ॥ बारइ इति भाषा । (यथा, मनुः ।

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः ॥"

महादेवः । यथा, महाभारते । १३।१७।६३ ।

"द्वादशस्तापनश्चाद्यो यज्ञो यज्ञसमाहितः ॥")

द्वादशकरः, पुं, (द्वादश करा भुजा यस्य ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥ कार्त्तिकेयश्च ॥

द्वादशपत्त्रकं, क्ली, (द्वादश अक्षराणि पत्त्राणि इव यस्य ।) योगविशेषः । यथा,—

"पितामहोऽपि तं पुत्त्रं साध्यं सविनये रतम् ।
सनत्कुमारं प्रोवाच योगं द्वादशपत्त्रकम् ॥
शिखासंस्थन्तु ओँकारं मेषोऽस्य शिरसि स्थितः ।
मासो वैशाखनामा च प्रथमं पत्त्रकं स्मृतम् ॥
नकारः शिरसि प्रोक्तो वृषोऽस्य शिरसि स्थितः ।
ज्यैष्ठमासश्च तत् पत्त्रं द्वितीयं परिकीर्त्तितम् ॥
मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितःम्
मास आषाढनामा च तृतीयं पत्त्रकं स्मृतम् ॥
भकारो नेत्रयुगलं कर्कटस्तत्र संस्थितः ।
मासः श्रावण इत्युक्तश्चतुर्थं पत्त्रकं स्मृतम् ॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च ।
मासो भाद्रस्तथा प्रोक्तः पञ्चमं पत्त्रकं स्मृतम् ॥
वकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता ।
मासश्चाश्वयुजो नाम षष्ठं तत्पत्त्रकं स्मृतम् ॥
तेकारमन्त्रग्रामश्च तुलाराशिकृताश्रयः ।
मासश्च कार्त्तिको नाम सप्तमं पत्त्रकं स्मृतम् ॥
वाकारो नाभिसंयुक्तः स्थितस्तत्र च वृश्चिकः ।
मासो मार्गशिरो नाम त्वष्टकं पत्त्रकं स्मृतम् ॥
सुकारो जघनः प्रोक्तस्तत्रस्थश्च धनुर्धरः ।
पुष्येति गदितो मासो नवमं परिकीर्त्तितम् ॥
देकारश्चोरुयुगलं मकरोऽप्यत्र संस्थितः ।
माघो निगदितो मासः पत्त्रकं दशमं स्मृतम् ॥
वाकारो जानुयुगलं कुम्भस्तत्रापि संस्थितः ।